नेषः स्फुटं नाद्वितीयः । इति नैषधं ॥

अद्वैतः, त्रि, ( द्विधाभेदमितः प्राप्तः । द्वित + स्वार्थे अण् न द्वैत । द्वितीयरहितः ।) एकः । यथा,—
यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा । इति श्रीचैतन्यचरितामृतं ॥

अद्वैतः, पुं, (द्विधाभेदमितः प्राप्तः द्वितीयातत्, प्रज्ञादित्वात् स्वार्थे अण ततोभिन्नः नञ्समासः ।) द्वैतरहितः विष्णुः । यथा,—
"विष्णुमानन्दमद्वैतं विज्ञानं सर्व्वगं प्रभुं ।
प्रणमामि सदा भक्त्या चेतसा हृदयालयं ॥"
इति गारुडे २३८ अध्यायः ॥ ० ॥ शिवावतारविशेषः । यथा,—
"नित्यानन्दो भक्तरूपो व्रजे यः श्रीहलायुधः ।
भक्तावतार आचार्य्योऽद्वैतो यः श्रीसदाशिवः ॥"
तत्पित्रादिविवरणं यथा,—
"महादेवस्य मित्रं यः कुवेरो गुह्यकेश्वरः ।
कुवेरपण्डितः सोऽद्य जनकोऽस्य विदांवरः ॥
पुरा कुवेरः कैलासे सिद्धसाध्यनिषेविते ।
जजाप परमं मन्त्रं शैवं श्रीशिववल्लभः ॥
ततो दयालुर्भगवान् वरं वृणिवति सोऽब्रवीत् ।
ततः कुवेरो वरयामास त्वं मे सुतो भव ॥
प्रार्थितस्तेन देवेशो वरदेशः सदाशिवः ।
जन्मजन्मान्तरे पुत्र प्राप्स्यामि पुत्रतां तव ॥
इति प्राप्य वरं कष्टं कियन्तं कालमास्थितः ।
कार्य्यादीशवशात् सोऽप्यद्वैतस्य जनकोऽभवत् ॥
योगमाया भगवती गृहिणी तस्य साम्प्रतं ।
सीतारूपेणावतीर्णा श्रीनाम्नी तत्प्रकाशतः ॥
तस्य प्रस्तोऽच्युतानन्दः कृष्णचैतन्यवल्लभः ।
श्रीमत्पण्डितगोस्वामिशिष्यप्रिय इति श्रुतं ॥
यः कार्त्तिकेयः प्रागासीदिति जल्पन्ति केचन" ।
इति गौरगणोद्देशदीपिका ॥

अद्वैतवादी, [ न् ] त्रि, ( अद्वैतं "चिदेव सत्यं नान्यत् किञ्चिन" इति वदति, अद्वैत + वद् + णिनि उपपदसमासः ।) एकब्रह्मवादी । तस्य मतं यथा,—
ब्रह्मैव सत्यं प्रत्यक्षादिसिद्धं विश्वं ब्रह्मणि आरोपितं । यथा रज्जुः रज्जुस्वरूपाज्ञानात् सर्पवत् प्रतिभाति । तथा ब्रह्मस्वरूपाज्ञानात् विश्वं वस्तुवत् प्रतिभाति प्रकृतिर्ज्जीवश्चापि पर्य्यवसाने ब्रह्मैव ब्रह्मान्यत् सदसत् नास्ति । अत्र प्रमाणं शारीरिकसूत्रस्य शङ्कराचार्य्यकृतभाष्यतट्टीकाकल्पतरुभामतीप्रभृति ॥

अधः [ स् ] अ, (अधरस्य अधादेशः ततः असिच् ।) तलं । नीचं । अधोभागः । यथा,—
"लोकानुपर्य्युपर्य्यास्तेऽधोऽधोऽध्यधि च माधवः" ।
इति वोपदेवः ॥ पातालं । योनिः । इति त्रिकाण्डशेषः ॥

अधःपुष्पी, स्त्री, ( अधः अधोमुखं पुष्पं यस्याः । अधस् + पुष्प + ङीप् । ) गोजिह्वा । इति राजनिर्घण्टः ॥ क्षुपविशेषः । हेठाञ्जली । चोरखड़िका । भाँटुइ इति भाषा । तत्पर्य्यायः । अवाक्पुष्पी २ मधुरा ३ अमरपुष्पिका ४ । इति रत्नमाला ॥

अधःक्षिप्तः, त्रि, (अधः अधोभागे क्षिप्तः पतितः ।) अधस्त्यक्तवस्तु । इति जटाधरः ॥

अधमः, त्रि, (अव पालने + अम, वस्य धादेशः ।) न्यूनः । निन्दितः । अपकृष्टः । तत्पर्य्यायः । निकृष्टः २ प्रतिकृष्टः ३ अर्व्वा ४ रेफः ५ याप्यः ६ अवमः ७ कुत्सितः ८ अवद्यः ९ कुपूयः १० खेटः ११ गर्ह्यः १२ अणकः १३ । इत्यमरः ॥ रेपः १४ अरमः १५ आणकः १६ अनकः १७ । इति तट्टीका ॥ (याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा । इति मेघदूते ) ॥

अधमः, पुं, (अव पालने + अम, वस्य धादेशः ।) उपपतिभेदः । तस्य लक्षणं । भयदयालज्जाशून्यत्वं । कामक्रीड़ाविषये कर्त्तव्याकर्त्तव्याविचारकत्वञ्च । इति रसमञ्जरी ॥

अधमभृतकः, त्रि, (अधम + भृ + क्त + स्वार्थे कन् ।) (अधमः । निकृष्टः । भृतकः । भृत्यः ।) अधमभृत्यः । नीचदासः । दौवारिकभारवाहकादयः ॥

अधमर्णः, त्रि, ( अधम + ऋण ऋणविषये अवश्यदेयविषये अधमः निन्दितः राजदन्तादित्वात् परनिपातः । वा अधमं ऋणमवश्यदेयत्वेन विद्यते यस्य ।) ऋणगृहीता । ऋणी । इत्यमरः ॥ खातक इति भाषा ।
("अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेत् धनिकस्यार्थमधमर्णात् विभावितं ॥
अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि ।
अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत्" ॥
इति मनुः । ) ॥

अधमर्णिकः, त्रि, ( अधममवश्यदेयत्वेन निन्दितं ऋणं । तदेव दातृत्वेन विद्यते अस्य । अधमर्ण + अत इनिठनाविति ठन् । तस्य इकः ।) अधमर्णः । यथा,—
"गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः ।
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरं ॥"
इति मिताक्षरा ॥
( "यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः ।
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकं" ॥
इति मनुः । ) ॥

अधमा, स्त्री, ( अधम + स्त्रियां टाप् ।) स्वीयाद्यन्तर्गतनायिकाभेदः । अस्या लक्षणं । हितकारिप्रियतमे अहितकारित्वं । अस्याः क्रिया अधमा । अस्या निष्कारणकोपत्वात् चण्डीति नाम । इति रसमञ्जरी ॥

अधमाङ्गं, क्ली, ( अधमम् अङ्गं कर्म्मधारयः । ) पादः । चरणः । इति शब्दचन्द्रिका ॥

अधरं, क्ली पुं, (न ध्रियते कामुकस्य धैर्य्यं न तिष्ठति यत्र, न + धृ + पुंसि संज्ञायां घः प्रायेणेति अधिकरणे घः ।) स्मरागारं । रतिगृहं । योनिरिति यावत् । इति शब्दरत्नावली त्रिकाण्डशेषश्च ॥

अधरः, पुं, (न ध्रियतेऽसौ धृ + अच् ततो नञ्समासः ।) मुखावयवविशेषः । नावा ठोँट । इति भाषा । ओष्ठः । उपर ठोँट । इति भाषा । तयोः पर्य्यायः । रदनच्छदः २ दशनवासः ३ । इत्यमरः ॥ परन्तु द्वयोरपि ओष्ठाधरप्रयोगः यथा । रदनच्छदौ दशनवाससी उभयत्र वर्त्तेते तथा ओष्ठाधरावपि उभयत्रेति नयनानन्दः ॥ रायमुकुटोऽप्याह उपरिवर्त्ती अधोवर्त्ती च ओष्ठः अधरोऽप्येवं । पुरुषस्य रक्ताधरः प्रशस्तः । यथा,—
"पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्त रक्तं प्रशस्यते ॥"
स्त्रियास्तु यथा,—
"पाटलावर्त्तुलः स्निग्धो रेखाभूषितमध्यभूः ।
सीमन्तिनीनामधरो राज्ञां चैव प्रियो भवेत् ॥
श्यामः स्थूलोऽधरोष्ठः स्यात् वैधव्यकलहप्रदः ।
मस्या मस्तकाशिन्यास्योत्तरोष्ठः सुभोगदः ॥"
इति सामुद्रकं ॥

अधरः, त्रि, (न धरः नञ्समासः । नीचः ।) अधः । तलं । हीनः । अपकृष्टः । इति मेदिनी ॥ हीनवादी । इति हेमचन्द्रः ॥ ( यथा शाकुन्तले । पिबसि रतिसर्व्वस्वमधरं । ) ॥

अधरतः, अ, [स्] (अधर + तसिल् प्रथमापञ्चमीसप्तम्यर्थवृत्तौ ।) अधस्तात् । अधोभागः । इति हलायुधः ॥

अधरमधु, क्ली, (अधरस्य मधु षष्ठीतत् ।) वक्त्रासवः । अधरामृतं । अधररसः । इति त्रिकाण्डशेषः ॥

अधरस्तात्, अ, अधरतः । इति हलायुधः ॥

अधरस्मात्, अ, (अधर + अस्ताति विकल्पे अधरस्य अधादेशः ।) अधस्तात् । अधरात् । दिग्वाचकशब्दात् दिग्देशकालवाचे प्रथमापञ्चमीसप्तमीनां स्थाने तात् प्रत्ययोभवति । इति व्याकरणं ॥

अधरा, स्त्री, ( न धरा नञ्समासः ।) अधोदिक् । इति व्याकरणं ॥ नीचा । यथा । अधराथ कृता ययैव सा । इति नैषधं ॥

अधरात्, अ, अधरतः । अधरेण । अधरस्तात् । इत्यमरटीका ॥

अधरामृतं, क्ली, (अधरस्य अमृतम् ।) अधरसुधा । यथा,—
"सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण
हासावलोककलगीतजहृच्छयाग्निं ।
नो चेद्वयं विरहजाग्न्युपयुक्तदेहा
ध्यानेन याम पदयोः पदवीं सखे ते ॥"
इति श्रीभागवते १० स्कन्धे २९ अध्यायः ॥

अधरीणः, त्रि, ( अधरःकृतः तिरस्कृतः अधर + ख तस्य ईन ।) धिक्कृतः । तिरस्कृतः । इति जटाधरः ॥

अधरेण, अ, (अधरे देशे अधरस्यां दिशि वा अधर + एनप् ।) अधोदिग्देशकालः । अधोदिक्देशकाले । इति व्याकरणं ॥

अधरेद्युः, [ स् ] अ, ( अधरे परे दिवसे अधर + एद्युस् ।) अधरदिवसः । परदिनं । इति शब्दरत्नावली ॥

अधर्म्मः, पुं, ( ध्रियतेऽनेन धृ + मनिन् ततो नञ्समासः, नञत्र विरोधार्थः । ) धर्म्मविरोधी । स तु ब्रह्मणः पृष्ठाज्जातः । इति श्रीभागवतं ॥ पापं ।